**SA-II**

**विषय : संस्कृतम्**

**कक्षा : VII**

अवधिः - होरात्रयम् | **पूर्णाङ्काः : 80**

निर्देशाः (i) *अस्मिन् प्रश्नपत्रे चत्वारः खण्डाः सन्ति।*

(ii) *प्रतिखण्ड-उत्तराणि पृथक् प्रदत्तायाम् उत्तरपुस्तिकायां लेखनीयानि।*

(iii) *प्रत्येकं खण्डं अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि।*

(iv) *प्रश्नपत्रे उत्तराणि न लेखनीयानि।*

(v) *प्रश्नसंख्या प्रश्नापत्रानुसारं अवश्यमेव लेखनीया।*

(vi) *सर्वेषां प्रश्नानां उत्तराणि संस्कृतेन लेखनीयानि।*

**खण्डः 'क' (अपठित-अवबोधनम्)** अंकाः 10

प्र1. अधोलिखितम् अनुच्छेदम् पठित्वा प्रदत्तप्रश्नानां उत्तराणि लिखत -

दिल्लीनगरे गणतन्त्रदिवसस्य उत्सवः प्रतिवर्षं विशेषणरूपेण भारतस्य राजधान्यां दिल्लीनगरे सम्मान्यते। दिल्लीनगरे 'इण्डिया गेट' नाम्नः स्थाने अस्य उत्सवस्य समारोहः भवति। अस्मिन् दिने देशस्य सर्वेषु भागेषु सर्वत्र उल्लासस्य हर्षस्य च वातावरणं जायते। देशस्य सर्वेभ्यः कोणेभ्यः जनाः नार्यः नेतारश्च अस्य उत्सवं द्रष्टुम् दिल्लीनगरे आगच्छन्ति। अत्र राष्ट्रपति-महोदयः ध्वजारोहणं करोति। सर्वे जनाः देशिनः विदेशिनः च उत्थाय राष्ट्रगानं गायन्ति। एकविंशति-तोपैः राष्ट्रपतेः सम्मानं क्रियते। ततः त्रयः अपि सेनाध्यक्षाः स्व-अत्याधुनिकैः शस्त्रास्त्रैः सह स्वयानेषु राजमार्गे विचरन्ति। राजमार्गे विद्यालयानां बालकाः बालिकाः च स्व क्रीडानां प्रदर्शनं कुर्वन्ति। भारतस्य विभिन्नानां प्रान्तानां नर्तकाः सांस्कृतिक-नृत्यानां प्रदर्शनं कुर्वन्ति। ततः सर्वेषां प्रान्तानां सामाजिकाः सांस्कृतिकदृश्याश्च प्रदर्शयन्ति। भारतवर्षे राष्ट्रियः अवकाशः भवति।

I. एकपदेन उत्तरत - (½x4=2)

(i) नर्तकाः केषाम् प्रदर्शनम् कुर्वन्ति?

(ii) गणतन्त्रदिवसस्य उत्सवः विशेषणरूपेण कस्मिन् नगरे सम्मान्यते?

(iii) जनाः उत्थाय किं गायन्ति?

(iv) 'इण्डिया गेट' इति स्थले राष्ट्रपतिः किम् करोति?

II. पूर्णवाक्येन उत्तरत - (2x2=4)

(i) सेनाध्यक्षाः किम् कुर्वन्ति?

(ii) भारतवर्षे कीदृशः अवकाशः भवति?

III. यथानिर्देशम् उत्तरत - (½x4=2)

(i) 'सर्वेभ्यः कोणेभ्यः' अनयोः पदयोः विशेषणपदं किम्?

(ii) 'दुःखस्य' अस्य किम् विलोमपदम् अत्र प्रयुक्तम्?

(iii) 'नर्तकाः सांस्कृतिक-नृत्यानां प्रदर्शनं कुर्वन्ति' अत्र 'कुर्वन्ति' क्रियापदस्य कर्तृपदं किम्?

(iv) 'आदरम्' अस्य किं पर्यायपदम् अत्र प्रयुक्तम्?

IV. अस्य गद्यांशस्य कृते समुचितं शीर्षकं लिखत। (2)

खण्डः 'ख' (रचनात्मकं कार्यं) अंकाः 15

प्र2. छात्रावास-जीवनस्य विषये पितरं प्रति लिखिते पत्रे मञ्जूषायां प्रदत्तैः उचितपदैः पूरयित्वा उत्तरपुस्तिकायां पुनः लिखत - (½x10=5)

| मञ्जूषा |
|---|
| सर्वेभ्यः, पुस्तकालयः, छात्रावासात्, पुत्रः, तत्रास्तु, भोजनालयः, पितृमहोदय, प्रकाशस्य, छात्राः, वृक्षाः |

(1)________

तिथिः________

पूज्य (2)________

सादरं नमामि।

अत्र कुशलं (3)________। ह्यः मया अध्यापकमहोदयानां निर्देशेन स्वावासकक्षं लब्धम्। कक्षे वायोः (4)________ च आगमनाय वातायनानि सन्ति। कक्षं परितः अनेके (5)________ सन्ति। अत्र एकः (6)________ अस्ति यत्र स्वादिष्टं भोजनं प्राप्यते। भोजनालयेन सह एकं सार्वजनिकं स्थानम् अस्ति। यत्र संगणककक्षः क्रीडाकक्षः (7)________ च विराजन्ते। छात्रावासे (8)________ मध्यरात्रिं यावत् पठन्ति अतः अध्ययनस्य अपि वातावरणं मह्यं लाभकरं भविष्यति। स्वगृहे (9)________ मम नमोनमः।

भवतः (10)________

क.ख.ग.

प्र3. अधः प्रदत्तं चित्रम् आधृत्य मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्चसंस्कृतवाक्यानि लिखत - (2x5=10)

| मञ्जूषा |
|---|
| गुरुकुलस्य, हस्ते, शिष्याः, पुस्तकम्, शशकः, आकाशे, वृक्षस्य अधः, भूमौ, कुटीरं, अस्ति, उत्पतति, मुनिः, आसने, विशालवृक्षाः, उपविशति, सर्वत्र |



## खण्डः 'ग' (अनुप्रयुक्त-व्याकरणम्) अंकाः 25

प्र4. कोष्ठगतशब्देषु उचितविभक्तिं प्रयुज्य वाक्यानि उत्तरपुस्तिकायाम् लिखत - (1x4=4)

(i) ____________ परितः वृक्षाः सन्ति। (देवालय)

(ii) ____________ नमः। (गणेश)

(iii) अहं ____________ सह विद्यालयं गच्छामि। (राम)

(iv) ____________ बहिः कूपः अस्ति। (ग्राम)

प्र5. (क) अधोलिखितवाक्येषु अंकानां स्थाने संख्यावाचक विशेषणैः रिक्तस्थानानि पूरयित्वा पुनः लिखत - (1x4=4)

(i) (3) ____________ बालकाः पुस्तकानि पठन्ति।

(ii) वने (14) ____________ गजाः भ्रमन्ति।

(iii) तडागे (45) ____________ कमलानि विकसन्ति।

(iv) उद्याने (37) ____________ नराः सन्ति।

(ख) कोष्ठकप्रदत्तक्रमवाचक संख्यापदैः उचितां विभक्तिं प्रयुज्य रिक्तस्थानपूर्तिं कुरुत - (1x3=3)

(i) ____________ बालकः अत्र न उपस्थितः। (दशम)

(ii) ____________ पुस्तके श्लोकाः सन्ति (अष्टम)

(iii) ____________ बालिका मम कक्षायां अस्ति। (द्वितीय)

प्र6. अधोलिखितवाक्येषु रेखांकितपदस्य प्रकृति-प्रत्ययौ पृथक्-पृथक् कृत्वा अथवा संयोज्य वाक्यानि पुनः लिखत - (1x4=4)

(i) त्वं तत्र <u>(गम् + क्त्वा)</u> क्रीड।

(ii) चौरः धनं <u>चोरयित्वा</u> धावति।

(iii) शिशुः दुग्धम् <u>पा + क्त्वा</u> प्रसन्नः भवति।

(iv) अहं <u>स्नात्वा</u> पूजां करोमि।

प्र7. उचितशब्दरूपैः रिक्तस्थानानि पूरयित्वा वाक्यं पुनः लिखत - (1x5=5)

(i) ____________ कन्या विद्यालयं गच्छति। (एतद्)

(ii) ____________ मत्स्याः तरन्ति। (वारि - सप्तमी विभक्तिः, एकवचनम्)

(iii) बालकः ____________ अनुसारं कार्यं करोति। (मति - षष्ठी विभक्तिः, एकवचनम्)

(iv) हे ____________! अहं नमामि। (पितृ)

(v) ____________ फलानि मधुराणि सन्ति। (एतद्)

प्र8. उचितधातुरूपैः रिक्तस्थानानि पूरयित्वा वाक्यं पुनः लिखत - (1x5=5)

(i) अजाः क्षेत्रे ____________। (चर्)

(ii) रामः स्वप्रतिज्ञां पूर्णम् ____________। (कृ - लङ् लकारे)

(iii) वयं मिलित्वा कार्यम् ____________। (कृ)

(iv) श्वः त्वं भोजनं न __________ । (पच्)

(v) ते कवितां __________ । (लिख्)

## खण्डः 'घ' (पठित-अवबोधनम्) अंकाः 35

प्र9. अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानां उत्तराणि लिखत - (5)

विरक्तभावेन पिता उदतरत् - "अनारिके! प्रस्तराणि जनाः पर्वतेभ्यः आनयन्ति।" "पितः! तर्हि किम्, एतदर्थं मन्त्री धनं ददाति? तस्य पार्श्वे धनानि कुतः आगच्छन्ति?" एतान् प्रश्नान् श्रुत्वा पिताऽवदत् - "अरे! प्रजाः सर्वकाराय धनं प्रयच्छन्ति।" विस्मिता अनारिका पुनः अपृच्छत् - "पितः! कर्मकराः पर्वतेभ्यः प्रस्तराणि आनयन्ति। ते एव सेतुं निर्मान्ति। प्रजाः सर्वकाराय धनं ददति। तथापि सेतोः उद्घाटनार्थं मन्त्री किमर्थम् आगच्छति?"

I. एकपदेन उत्तरत - (½x2=1)
   - (i) कर्मकराः पर्वतेभ्यः कानि आनयन्ति?
   - (ii) का विस्मिता आसीत्?

II. पूर्णवाक्येन उत्तरत - (1x2=2)
   - (i) प्रजाः सर्वकाराय किं प्रयच्छन्ति?
   - (ii) विरक्तभावेन पिता किम् उदतरत्?

III. यथानिर्देशम् उत्तरत - (½x4=2)
   - (i) 'अपृच्छत्' क्रियापदस्य कर्तृपदम् किम् अस्ति?
   - (ii) 'पाषाणाः' इत्यर्थे किम् पदम् अत्र प्रयुक्तम्?
   - (iii) 'गच्छति' अस्य किम् विलोमपदम् अत्र प्रयुक्तम्?
   - (iv) 'समीपे' अस्य किम् पर्यायपदम् अत्र प्रयुक्तम्?

प्र10. अधोलिखितं पद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत - (5)

उष्ट्रः तुङ्गः मन्दं गच्छति, पृष्ठे प्रचुरं भारं निवहति।
घोटकराजः क्षिप्रं धावति धावनसमये किमपि न खादति ॥

I. एकपदेन उत्तरत - (1x2=2)
   - (i) कः धावति?
   - (ii) कः मन्दं गच्छति?

II. पूर्णवाक्येन उत्तरत - (1x2=2)
   - (i) उष्ट्रः पृष्ठे किं निवहति?
   - (ii) घोटकराजः कदा न खादति?

III. यथानिर्देशम् उत्तरत - (½x2=1)
   - (i) 'मन्दं' अस्य किम् विलोमपदम् अत्र प्रयुक्तम्?
   - (ii) 'प्रचुरं भारं' अनयोः पदयोः विशेषणपदं किम् अस्ति?

प्र11. अधोलिखितं नाट्यांशं पठित्वा प्रदत्तप्रश्नानां उत्तराणि लिखत - (5)

(केचन बालकाः काश्चन बालिकाश्च स्वतन्त्रता-दिवसस्य ध्वजारोहण-समारोहे सोत्साहं गच्छन्तः परस्परं संलपन्ति)

देवेशः - अद्य स्वतन्त्रतादिवसः। अस्माकं विद्यालयस्य प्राचार्यः ध्वजारोहणं करिष्यति। छात्राश्च सांस्कृतिककार्यक्रमान् प्रस्तोष्यन्ति। अन्ते च मोदकानि मिलिष्यन्ति।

डेविडः - शुचे! जानासि त्वम्? अस्माकं ध्वजः कीदृशः?

शुचिः - अरे! अस्माकं देशस्य ध्वजः त्रिवर्णः इति।

सलीमः - रूचे! अयं त्रिवर्णः कथम्?

रुचिः - अस्मिन् ध्वजे त्रयः वर्णाः सन्ति, अतः त्रिवर्णः।

I. एकपदेन उत्तरत - (½x2=1)

(i) अस्माकं ध्वजे कति वर्णाः सन्ति?

(ii) अन्ते कानि मिलिष्यन्ति?

II. पूर्णवाक्येन उत्तरत - (1x2=2)

(i) छात्राः कान् प्रस्तोष्यन्ति?

(ii) कः ध्वजारोहणं करिष्यति?

III. यथानिर्देशम् उत्तरत - (½x4=2)

(i) 'जानासि' क्रियापदस्य कर्तृपदं किम्?

(ii) 'युष्माकं' अस्य किम् विलोमपदम् अत्र प्रयुक्तम्?

(iii) 'अस्मिन् ध्वजे' अनयोः पदयोः विशेषणपदं किम्?

(iv) 'पताका' अस्य किम् पर्यायपदम् अत्र प्रयुक्तम्?

प्र12. अधोलिखित-श्लोकस्य अन्वयं उचितक्रमेण पूरयित्वा उत्तरपुस्तिकायां पुनः लिखत - (1x4=4)

विद्या बन्धुजनो विदेशगमने विद्या परा देवता।
विद्या राजसु पूज्यते न हि धनं विद्या-विहीनः पशुः ॥

अन्वयः - विदेशगमने (i) __________ बन्धुजनः विद्या परा (ii) __________ हि (iii) __________ विद्या पूज्यते धनं न विद्या-विहीनः (iv) __________ ।

प्र13. अधोलिखितवाक्येषु रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरुत - (1x4=4)

(i) गजः वृक्षस्य शाखां शुण्डेन अत्रोटयत्।

(ii) एतत् न्यायस्य प्रवर्तकम्।

(iii) हरिणः नवघासम् खादति।

(iv) अनारिका भ्रमितुं गृहात् बहिः अगच्छत्।

प्र14. अधोलिखितवाक्यानि घटनाक्रमानुसारेण पुनः लिखत - (½x8=4)

(i) चटकायाः विलापं काष्ठकूटः नामकः खगः अशृणोत्।

(ii) गर्तं जलाशयं मत्वा गजः गर्तस्य अन्तः पतितः मृतः च।

(iii) काष्ठकूटः चटकां मक्षिकायाः समीपम् अनयत्।

(iv) एकदा एकः गजः वृक्षस्य अधः आगत्य चटकायाः अण्डानि नष्टम् अकरोत्।

(v) एकस्मिन् वृक्षे एका चटका वसति स्म।

(vi) मण्डूकः तान् सर्वान् एकं उपायम् अवदत्।

(vii) मक्षिका, काष्ठकूटः चटका च सर्वे मिलित्वा मण्डूकस्य समीपम् अगच्छत्।

(viii) मण्डूकः मध्याह्ने गर्तस्य समीपं गत्वा शब्दम् अकरोत्।

प्र15. अर्थैः सह शब्दानाम् मेलनं कृत्वा पुनः उत्तरपुस्तिकायाम् लिखत - (½x6=3)

| शब्दाः | अर्थाः |
|---|---|
| नयने | भयानकम् |
| विपिने | उन्नतेः |
| अधः | नेत्रे |
| पृथिवी | नीचैः |
| प्रगतेः | धरणी |
| करालम् | वने |